# || श्री गुरुपादुका स्तोत्रम्  ||

अनन्तसंसारसमुद्रतारनौकायिताभ्यां गुरुभक्तिदाभ्याम् |

वैराग्यसाम्राज्यदपूजनाभ्यां नमो नमः श्री गुरुपादुकाभ्याम् || १ ||

कवित्ववाराशिनिशाकराभ्यां दौर्भाग्यदावाम्बुदमालिकाभ्याम् |

दूरीकृतानम्रविपत्ततिभ्यां नमो नमः श्री गुरुपादुकाभ्याम् || २ ||

नता ययोः श्रीपतितां समीयुः कदाचिदप्याशु दरिद्रवर्याः |

मूकाश्च वाचस्पतितां हि ताभ्यां नमो नमः श्री गुरुपादुकाभ्याम् || ३ ||

नालीकनीकाशपदाहृताभ्यां नानाविमोहादिनिवारिकाभ्याम् |

नमज्जनाभिष्टततिप्रदाभ्यां नमो नमः श्री गुरुपादुकाभ्याम् || ४ ||

नृपालिमौलिव्रजरत्नकान्तिसरिद्विराजज्झषकन्यकाभ्याम् |

नृपत्वदाभ्यां नतलोकपन्क्तेः नमो नमः श्री गुरुपादुकाभ्याम् || ५ ||

पापान्धकारार्कपरम्पराभ्यां तापत्रयाहीन्द्रखगेश्वराभ्याम् |

जाड्याब्धिसंशोषणवाडवाभ्यां नमो नमः श्री गुरुपादुकाभ्याम् || ६ ||

शमादिषट्कप्रदवैभवाभ्यां समाधिदानव्रतदीक्षिताभ्याम् |

रमाधवाङ्घ्रिस्थिरभक्तिदाभ्यां नमो नमः श्री गुरुपादुकाभ्याम् || ७ ||

स्वार्चापराणामखिलेष्टदाभ्यां स्वाहासहायाक्षधुरन्धराभ्याम् |

स्वान्ताच्छभावप्रदपूजनाभ्यां नमो नमः श्री गुरुपादुकाभ्याम् || ८ ||

कामादिसर्पव्रजगारुडाभ्यां विवेकवैराग्यनिधिप्रदाभ्याम्  |

बोधप्रदाभ्यां दृतमोक्षदाभ्यां नमो नमः श्री गुरुपादुकाभ्याम् || ९ ||

नमो नमः श्री गुरुपादुकाभ्याम् | नमो नमः श्री गुरुपादुकाभ्याम् |